# ।। इष्टलिङ्गपूजाविधिः ।।

सम्पादकः
डॉ.शशिकांत बसवेश्वर दरगु मोदी

Ishtalingapoojavidhih

By

Dr. Shashikant Basveshwar Dargu Modi
Assistan Professor, Department of Sanskrit,
Netaji Subhashchandra Bose College, Nanded.431601
Email- shashi.modi143@gmail.com
09405773134

Publisher – Dr. Shashikant Basveshwar Dargu Modi
Date- 19/10/2018
Price- 30/-
ISBN No -978-93-5321-893-5
Edition – First
E-Book publication

All rights reserved. No part of this book may be reproduced in any form or by any electronic or mechanical means, including information storage and retrieval systems, without permission in writing from the publisher, except by reviewers, who may quote brief passages in a review.

## ।। अथ श्रीइष्टलिङ्गपूजाविधिः ।।

।। स्नानम् ।।

पुनन्तु मा देवजनाः पुनन्तु मनसाधियः। पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा।। इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमगं सचता परुष्णिया। असिक्निया मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया।।

।। जलाभिमन्त्रणम् ।।

यदपां क्रुरं यदमेध्यं यदशान्तं तदपगच्छतात्। अत्याशनादतीपानाद्यच्च उग्रात् प्रतिग्रहात्। तन्मे वरुणो राजा पाणिना ह्यवमर्शतु।।

।। हस्तप्रक्षालनम् ।।

आपो वा इदं सर्वं विश्वा भूतान्यापः। प्राणा वा आपः पशवः आपोऽमृतमापोऽन्नमापस्सम्राडापो विराडापः स्वराडापच्छन्दाॅंस्यापो ज्योतीॅंष्यापो यजूॅंष्यापस्सत्यमापस्सवा देवता आपो भूर्भुवस्सुवरापः ओम्।। इति स्नानमन्त्रः।।

।। वस्त्रधारणम् ।।

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रामन्तवोह सर्गाः। अवातिरतमनृतानि विश्वऋतेन मित्रावरुणा सचेथे।।

।। पूजागृहप्रवेशः ।।

सर्वज्ञाय नमः। चत्वारि शृङ्गा त्रयो अस्य पादाः द्वे शीर्षे सप्तहस्तासोऽस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यांग् आविवेश।।

।। आसनम् ।।

पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्।। आसनमन्त्रस्य पृथिव्या मेरुपृष्ठऋषिः। सुतलं छन्दः। परशिवप्रेरितो विष्णुरुद्रांशो देवता। लं पृथिव्यात्मने अष्टमूर्त्यंतर्गतान्तर्यामिने श्रीकण्ठरुद्राय नमः। ओं ऱ्हीं ऱ्हुं हर हर सोऽहं हंसः पृथिवीशुद्ध्यधिपाय परमासनाय नमः।।

।। अथ क्षुद्रोपद्रवनिवृत्तिः।।

गणास्सर्वे समागत्य शिवपूजागृहे मम। पूजाविघ्नकरानद्य दूरीकुर्यात्सुरादरात्।। ओं खं ठं यं फं क्षुद्रोपद्रवं नाशय नाशय हुं फट् स्वाहा।। (दशदिशायां जलप्रक्षालयित्वा त्रिवारं तालिकां वादयतु ) चरणं पवित्रं विततं पुराणम्। येन पूतस्तरेति दुष्कृतानि। तेन पवित्रेण शुद्धेन पूताः। अतिपाप्मानमरातिं तरेम।।

।। आचमनम्।।

ओं आत्मतत्त्वं शोधयामि स्वाहा, ओं विद्यातत्त्वं शोधयामि स्वाहा, ओं शिवतत्त्वं शोधयामि स्वाहा। ऋग्वेदाय स्वाहा। यजुर्वेदाय स्वाहा। सामवेदाय स्वाहा। अथर्वणवेदाय नमः।। अपउपस्पृश्य।

।। हस्तप्रक्षालनम्।।

ओं देवीं वाचमजनयन्त देवाः तां विश्वरुपाः पशवो वदन्ति। सा नो मन्देष मुर्जं दुहाना धेनुर्वागस्मानृपसिष्टुतैतुसुमुहूर्तोऽस्तु सुप्रतिष्ठितमस्तु।।

।। प्राणायामः।।

ओं भूः ओं भुवः ओं सुवः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्सवितुर्वरेण्यम्। भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्।।

।। सङ्कल्पः।।

हरः ओं शिव शिव शम्भोराज्ञया प्रवर्तमानस्याद्यब्रह्मणो द्वितीय परार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे जम्बूद्वीपे भरतवर्षे भरतखण्डे मेरोर्दक्षिणदिग्भागे महाराष्ट्रदेशे व्यावहारिकचान्द्रमाने शालीवाहनशके प्रभवादिषष्टिसंवत्सराणां मध्ये.....संवत्सरे...अयने...... ऋतौ...मासे...पक्षे....वासरे...नक्षत्रे...योगे...करणयुक्तायां....शुभतिथौ.. गोत्रोत्पन्नोऽहं....ममोत्पातदुरितक्षयद्वारा श्रीपार्वतीपरमेश्वरप्रीत्यर्थम् इष्टलिङ्गपूजां करिष्ये।

।। गुरुवन्दनम् ।।

पञ्चाननतनूद्भूतान् पञ्चाक्षरमनूपमान्। पञ्चसूत्रकृतो वन्दे पञ्चाचार्यान् जगद्गुरुन् ।।

।। शिववन्दनम् ।।

हृत्पद्मं शिवधर्मकन्दसहितं सुज्ञाननालं तथा नित्यैश्वर्यदलाष्टकं शशिनिभं वैराग्यसत्कर्णिकम्। श्रीरुद्रेश्वरकेसरान्वितमिदं सञ्चिन्त्य तन्मध्यमे सूर्येन्दूज्ज्वलवह्निमण्डलगतं ध्याये शिवं चिन्मयम् ।।

।। भस्मधारणविधिः ।।

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम् ।। कुरङ्गमुद्रया गृहित्वा दक्षिणपादे संस्थाप्य अष्टधा मूलमन्त्रोच्चारणं कुर्यात्।

।। भस्मन्यासः।।

अस्य श्रीविभूतिधारणमहामन्त्रस्य पिप्पलाद ऋषिः। देवी गायत्री छन्दः। कालाग्निरुद्रो देवता। अग्निरिति बीजम्। भस्मेति शक्तिः। शिव इति कीलकम्। मम शिवज्ञानसम्पत्सिध्यर्थं भस्मधारणे विनियोगः।।

।। करन्यासः।।

कालाय नमः—अङ्गुष्ठाभ्यां नमः। कलविकरणायनमः —तर्जनीभ्यां नमः। बलविकरणाय नमः — मध्यमाभ्यां नमः। बलाय नमः बलप्रमथनाय नमः — अनामिकाभ्यां नमः। सर्वभूतदमनाय नमः —कनिष्ठिकाभ्यां नमः। मनोन्मनाय नमः — करतलकरपृष्ठाभ्यां नमः।

।। अङ्गन्यासः।।

कालाय नमः — हृदयाय नमः। कलविकरणाय नमः — शिरसे स्वाहा। बलविकरणाय नमः — शिखायै वषट्। बलाय नमः बलप्रमथनाय नमः — कवचाय हुं। सर्वभूतदमनाय नमः — नेत्रत्रयाय वौषट्। मनोन्मनाय नमः — अस्त्राय फट्।

।। पञ्चब्रह्ममन्त्राः ।।

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः।।

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः।।

अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रूद्ररुपेभ्यः।।

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्।।

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणाधिपतिर्ब्रह्मा शिवो मेऽस्तु सदाशिवोम्।।

अभिमर्शनमन्त्रस्य अथर्वशिखरुद्र ऋषिः। अनुष्टुप् छन्दः। अथर्वशिखरुद्रः देवता। अभिमर्शने विनियोगः।। अग्निरिति भस्म

वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म भस्मेति भस्म सर्वगॅ ह वा इदं भस्म मन इत्येतानि चक्षूंगॅषि भस्मानि।

।। भस्मस्नानम्।।

ईशान – मस्तक ०५ पूर्व : शशिन्यै नमः, पश्चिम : अङ्गदायै नमः, दक्षिणः इष्टदायै नमः, उत्तर : मरीच्यै नमः, ऊर्ध्व : ज्वलिन्यै नमः।

तत्पुरुष – मुख ०४ पूर्व : शान्त्यै नमः, पश्चिम : विद्यायै नमः, दक्षिण : प्रतिष्ठायै नमः, उत्तर : निवृत्यै नमः।

अघोर – ०८ हृदये : तामस्यै नमः, कण्ठे : मोहायै नमः, दक्षिणस्कन्धे : अक्षयायै नमः, वामस्कन्धे : कनिष्ठायै नमः, नाभौ – मृत्यवे नमः, उदरे : मायायै नमः, दक्षिणवक्ष्ये : अभयायै नमः, वामवक्ष्ये : जरायै नमः।

वामदेव – १३ मलस्थाने : विरजायै नमः, जननेन्द्रिये : रक्षायै नमः, दक्षिणजंघायां: रत्यै नमः, वामजंघायां : पालिन्यै नमः, दक्षिणजानु :

संज्ञायै नमः, वामजानु : संयमिन्यै नमः, दक्षिणपादे : क्रियायै नमः, वामपादे : बुद्धयै नमः, दक्षिणनितम्बे : कालायै नमः, वामनितम्बे : दात्रे नमः, कटौ : भ्रामिण्यै नमः, दक्षिणउदरे : मोहिन्यै नमः, वामउदरे : भवायै नमः।

सद्योजात – ०८ दक्षिणहस्ते : सिद्धयै नमः, वामहस्तेः ऋद्धयै नमः, दक्षिणपादे : द्युत्यै नमः, वामपादेः लक्ष्म्यै नमः, नासिकायां : मेधायै नमः, मुखे : कान्त्यै नमः, दक्षिणहस्ते : श्रद्धायै नमः, वामहस्ते : धृत्यै नमः।

मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषु रीरिषः।
वीरान्मानो रुद्र भामितोवधीर्हविष्मन्तो नमसा विधेम ते।।
त्रियायुषं जमदग्नेः कश्यपस्य त्रियायुषं। अगस्तस्य त्रियायुषम्।
यद्देवानां त्रियायुषं तन्मे अस्तु त्रियायुषम्।।

।। भस्मधारणम् ।।

शिवाय नमः शिरसि, महेश्वराय नमः ललाटे, रुद्राय नमः श्रोत्रद्वये, श्रीकण्ठाय नमः कण्ठे, शम्भवे नमः भुजद्वये, ईश्वराय नमः हृदये, महादेवाय नमः नाभौ, पशुपतये नमः पृष्ठदेशे, शङ्कराय नमः बाहुयुग्मे, वृषभध्वजाय नमः ककुद्देशे, परमात्मने नमः मणिबन्धद्वये।।

।। रुद्राक्षधारणविधिः।।

रुद्राक्षवृक्षबीजाय भूतिसम्भूतिहेतवे। नेत्रत्रयाय रुद्राय नमो लोकहितार्थिने।। श्री सदाशिवाय नमः शिखायाम् ०१, वह्निसूर्य सोमाधिपाय नमः मस्तके ०३, षट्त्रिंशत्तत्त्वात्मने नमः आशिरसि ३६, षड्ब्रह्मणे नमः दक्षिणकर्णे ०६, अष्टमूर्त्यात्मने नमः वामकर्णे ०६, त्र्यम्बककलात्मने नमः कण्ठे ३२, श्रीकण्ठादिमूर्त्यात्मने नमः हृदये ५०, सुखासनादिषोडशमूर्त्यात्मकाय श्रीकण्ठाय नमः दक्षिणहस्ते १६, सोमकलात्मकाय श्री सोमनाथाय नमः वामहस्ते १६, द्वादशादित्यात्मने महादेवाय नमः दक्षिणमणिबन्धे १२,

केशवादिमूर्त्यधिपाय श्रीमदुमापतये नमः वाममणिबन्धे १२,शतरुद्रविद्येश्वरात्मने श्री विश्वेश्वराय नमः यज्ञोपवीतम् १०८

।। पञ्चाक्षरमन्त्रन्यासः।।

अस्य श्रीपञ्चाक्षरमहामन्त्रस्य वामदेवऋषिः — शिरसि। पङ्क्तिः छन्दः — मुखे। श्री सदाशिवः देवता — हृदये। ओं बीजम् — नाभौ। उमा शक्तिः — गुह्ये। शिव इति कीलकम् — पादयोः। श्री सदाशिवप्रीत्यर्थे जपे विनियोगः।।

।। ब्रह्मचारीणां कृते सृष्टिन्यासः।।

।। करन्यासः।।

ओं यं ओं सर्वज्ञशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः। ओं वां ओं नित्यतृप्तिशक्तिधाम्ने तर्जनीभ्यां नमः। ओं शिं ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः। ओं मं ओं स्वतन्त्रशक्तिधाम्ने अनामिकाभ्यां नमः। ओं नं ओं अलुप्तशक्तिधाम्ने कनिष्ठिकाभ्यां नमः। ओं ओं ओं अनंतशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः।

।। देहन्यास:।।

ओं यं ओं  ईशानाय नम:। शिरसि, ओं वां ओं तत्पुरुषाय नम:। मुखे, ओं शिं ओं अघोराय नम:। हृदये, ओं मं ओं वामदेवाय नम:। गुह्ये, ओं नं ओं सद्योजाताय नम:। पादव्दये, ओं ओं ओं प्रणवाय नम:।  सर्वाङ्गें

।। अङ्गन्यास:।।

ओं यं ओं सर्वज्ञशक्तिधाम्ने हृदयाय नम:। ओं वां ओं नित्यतृप्तिशक्तिधाम्ने शिरसे स्वाहा। ओं शिं ओं अनादिबोधशक्तिधाम्ने शिखायै वषट्। ओं मं ओं स्वतन्त्रशक्तिधाम्ने कवचाय हुं। ओं नं ओं अलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट्। ओं ओं ओं अनन्तशक्तिधाम्ने अस्त्राय फट्। ओं ओं ओं भूर्भवस्सुवरोमिति दिग्बंध:।

।। गृहस्थानां कृते स्थितिन्यासः।।

।। करन्यासः।।

ओं शि ओं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः। वां नित्यतृप्तिशक्तिधाम्ने अनामिकाभ्यां नमः। यं सर्वज्ञशक्तिधाम्ने कनिष्ठिकाभ्यां नमः। नं अलुप्तशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः। मं स्वतन्त्रशक्तिधाम्ने तर्जनीभ्यां नमः। ओं अनन्तशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः।

।। देहन्यासः।।

शिं अघोराय नमः। हृदये, वां वामदेवाय नमः। गुह्ये, यं सद्योजाताय नमः। पादद्वये, नं ईशानाय नमः। शिरसे, मं तत्पुरुषाय नमः। मुखे, ओं प्रणवाय नमः। सर्वाङ्गे

।। अङगन्यासः।।

शिं अनादिबोधशक्तिधाम्ने कवचाय हुं। वां नित्यतृप्तिशक्तिधाम्ने नेत्रत्रयाय वौषट्। यं सर्वज्ञशक्तिधाम्ने अस्त्राय फट्। नं

अलुप्तशक्तिधाम्ने हृदयाय नमः। मं स्वतन्त्रशक्तिधाम्ने शिरसे स्वाहा। ओं अनन्तशक्तिधाम्ने शिखायै वषट्। ओं भूर्भुवस्सुवरोमिति दिग्बंधः।

।। सन्यस्तानां कृते संहारन्यासः।।

।। करन्यासः।।

नं अलुप्तशक्तिधाम्ने कनिष्ठिकाभ्यां नमः। मं स्वतंत्रशक्तिधाम्ने अनामिकाभ्यां नमः। शिं अनादिबोधशक्तिधाम्ने मध्यमाभ्यां नमः। वां नित्यतृप्तिशक्तिधाम्ने तर्जनीभ्यां नमः। यं सर्वज्ञशक्तिधाम्ने अङ्गुष्ठाभ्यां नमः। ओं अनंतशक्तिधाम्ने करतलकरपृष्ठाभ्यां नमः।

।। देहन्यासः।।

नं सद्योजाताय नमः। पादद्वये, मं वामदेवाय नमः। गुह्ये, शिं अघोराय नमः। हृदये, वां तत्पुरुषाय नमः। मुखे, यं ईशानाय नमः। शिरसे, ओं प्रणवाय नमः। सर्वाङ्गे

।। अङ्गन्यासः।।

नं अलुप्तशक्तिधाम्ने अस्त्राय फट्। मं स्वतन्त्रशक्तिधाम्ने नेत्रत्रयाय वौषट्। शिं अनादिबोधशक्तिधाम्ने कवचाय हुं। वां नित्यतृप्तिशक्तिधाम्ने शिखायै वषट्। यं सर्वज्ञशक्तिधाम्ने शिरसे स्वाहा। ओं अनंतशक्तिधाम्ने हृदयाय नमः।

ओं भूर्भुवस्सुवरोमिति दिग्बन्धः।

।। पञ्चाक्षरीमन्त्रजपः।।

।। घण्टानादः।।

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्। कुर्याद् घण्टारवं भक्त्या शम्भोरर्चनपूर्वकम्।।

।। कलशपूजा।।

पूर्वे : मं वन्हिमण्डलाय दशकलात्मने नमः। आग्नेये : अं अर्कमण्डलाय द्वादशकलात्मने नमः। दक्षिणे : उं सोममण्डलाय षोडशकलात्मने नमः। नैऋत्ये : इच्छाशक्त्यै नमः। पश्चिमे : ज्ञानशक्त्यै नमः। वायव्ये : क्रियाशक्त्यै नमः। उत्तरे : पराशक्त्यै

नमः। ईशाने : चित्शक्त्यै नमः। कलशस्य अष्टदिशायां तण्डुलान् प्रक्षाल्य कलशोदकं सप्तवारं मूलमन्त्रेणाभिमन्त्रयेत्।

।। अथ कलशपूजामन्त्रः।।

कलशस्य मुखे रुद्रः कण्ठे विष्णुः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।।१।। कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा। ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।।२।। अङ्गैश्च सहितास्सर्वे कलशन्तु समाश्रिताः। गायत्री चैव सावित्री शान्तिः पुष्टिकरी तथा।।३।। आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः। गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।। इति कलशे रुद्रादिदेवता आवाह्य, अष्टविधोपचारैः सम्पूज्य तेनोदकेन पूजाद्रव्याणि आत्मानञ्च सम्प्रोक्ष्य, शेषं विसर्जयेत्।।

।। गङ्गावाहनम्।।

गायत्रीमावाहयामि, सावित्रीमावाहयामि, सरस्वतीमावाहयामि। एह्येही गङ्गे सरस्वति ऱ्हां श्रीं शिवपूजार्थं सन्निधस्व सन्निधस्व स्वाहा।।

सप्तवारं मूलमन्त्रैः अभिमन्त्रयित्वा शुद्धोदकं पूजाद्रव्योपरी प्रक्षालयेत्। ओङ्कारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं चैव। ओङ्काराय नमो नमः।।

।। गणपतिपूजा।।

यजमानः रङ्गवल्लीविराजिते भूतले प्रस्थपरिमित तण्डुलराशेरुपरि अष्टदलकमलं विलिख्य, तत्र गणपतिं संस्थाप्य प्रारिप्सितस्य कर्मणः निर्विघ्नेन उत्तरोत्तराभिवृद्ध्यर्थमादौ महागणपतिपूजां करिष्ये।।

इति सङ्कल्प्य।।

ओं भूः महागणपतिमावाहयामि। ओं भुवः महागणपतिमावाहयामि। ओं सुवः महागणपतिमावाहयामि। ओं भूर्भुवस्सुवः महागणपतिमावाहयामि। सशक्तिं साङ्गं सायुधं सवाहनं सपरिवारं महागणाधीश्वर अत्रागच्छ। आवाहयामि आवाहितो भव। स्थापयामि स्थापितो भव। सन्निहितो भव। सम्मुखो भव। अवकुण्ठितो भव। वरदो भव। इति षण्मुद्राः प्रदर्श्य।। श्रीमहागणपतये नमः ध्यायामि,

ध्यानं समर्पयामि। आवाहयामि रत्नसिंहासनं समर्पयामि। पादयोः पाद्यं समर्पयामि। हस्तयोः अर्घ्यम् समर्पयामि मुखाम्बुजे आचमनीयं समर्पयामि। षोडशोपचारैः पूजां कुर्यात्।।

।। दीपप्रज्वलनम्।।

ऱ्हीं दीपाधाराय नमः। रं ज्वालामालिने नमः।

।। इष्टलिङ्गप्रार्थना।।

उत्तिष्ठ ब्रह्मणस्पते। देवयंस्त्वेमहे। उपप्रयन्तु मरुतस्सुदानवः। इन्द्रप्राशुर्भवासचा। प्रैतु ब्रह्मणस्पतिः। प्रदेव्ये तु सूनृता। अच्छावीरं नर्यं पङ्क्तिराधसं। देवायज्ञं नयन्तु नः।। इष्टलिङ्गमवलोकयित्वा प्रार्थनापूर्वकं त्रिवारं मूलमन्त्रं जपेत्।

।। लिङ्गस्नानम्।।

शिवाय नमः, रुद्राय नमः, पशुपतये नमः, नीलकण्ठाय नमः, विरूपाक्षाय नमः, पिनाकिने नमः, त्रिपुरान्तकाय नमः, शम्भवे नमः,

शूलिने नमः, महादेवाय नमः।। पूष्पाणि अर्पयित्वा करपीठार्चनं कुर्यात्।

।। करपीठार्चनम्।।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे।। कुरङ्गमुद्रया लिङ्गं करपीठे वामगोमुखं कृत्वा स्थापयेत्। वेदान्तवेद्याखिलविश्वमूर्ते विभो विरूपाक्ष विशेषशून्य। प्रसीद सर्वेश्वर पार्वतीश विश्वेश्वराशेषविशेषशून्य।। घण्टानादं कृत्वा पुष्पाञ्जलिं समर्पयेत्।

।। निर्माल्यम्।।

यो वै तां ब्रह्मणो वेद। अमृतेनावृतां पुरीम्।। तस्मै ब्रह्म च ब्रह्मा च। आयुः कीर्तिं प्रजां ददुः।।

।। अभिमुखीकरणम्।।

आते पितर्मरुतां सुम्नमेतु मानस्सूर्यस्य संदृशो यूयोथा:। अभिनो वीरो अर्वतिक्षमेत प्रजायेमहि रुद्र प्रजाभि:।। ओं भू: श्री साम्बाय नम: मूलेनाभिमुखीकरोमि।

।। सिंहासनम्।।

विश्वात्मने नमस्तुभ्यं शम्भवे सर्वजिष्णवे। रत्नसिंहासनं चारु ददामि शशिशेखर।। त्वा दत्तेभि: रुद्र शन्तमेभि: शतं हिमा अशीयभेषजेभि:। व्यऽस्मद्द्वेषो वितरं व्यंहो व्यमीवांश्चातयस्वाविषूची:।। ओं भुव: श्रीसाम्बाय नम: रत्नसिंहासनं समर्पयामि।

१ पाद्यम् — पांढरी मोहरी, दूर्वा, कोष्ट—कोलिजन, केशर, वाळा, पचकापूर

यद्भक्तिलेशसम्पर्कात्परमानन्दसम्भव:। तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये।। श्रेष्ठो जातस्य रुद्र श्रिया सितवस्तमस्तवसां

वज्रबाहो। पर्षिणः पारमहंसः स्वस्तिविश्वा अभी तीरपसो युयोधि।। ओं सुवः श्री साम्बाय नमः पाद्यं समर्पयामि।

२ अर्घ्यम्— पांढरी मोहरी, तीळ, साळी, देवजवा, दर्भ, गाईचे दूध व पाणी

तापत्रयहरं दिव्यं परमानन्दलक्षणम्। तापत्रयविनिर्मुक्त्यै तवार्घ्यं कल्पयाम्यहम्।। मात्वा रुद्र चुक्रुधा मा नमोभिर्मा दुष्टुती वृषभमा सहूती। उन्नो वीरां अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां श्रृणोमि।। ओं महः श्री साम्बाय नमः अर्घ्यं समर्पयामि।

३ आचमनम्—जायफळ, कोष्ठकोलिंजन, कचोरा, पचकापूर, वेलदोडे—विलायची, केशर

वेदानामपि वेदाय देवानां देवतात्मने। आचमं कल्पयामीश शुद्धानां शुद्धिहेतवे।। हवीमभिर्हवते यो हविर्भिरवस्तोमेभी रुद्रं दिषीय। ऋदूदरस्सुहवो मानो अस्यै बभ्रुः सुशिप्रोरोरीर धन्मनायै।। ओं जनः श्री साम्बाय नमः आचमनं समर्पयामि।

४ मधुपर्कम् — दूध, (दही, तूप,) मध, विलायची, लाहया, केशर, वाळा

सर्वकालुष्यहीनाय परिपूर्णसुखात्मने। मधुपर्कं महादेव कल्पयामि प्रसीद मे।। मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नस्संत्वोषधीः। मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधुद्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधु मां अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।। ओं तपः श्री साम्बाय नमः मधुपर्कं समर्पयामि।।

५ स्नानम्।।

परमानन्दबोधाब्धौ निमग्ननिजमूर्तये। साङ्गोपाङ्गमिदं स्नानं कल्पयामि प्रसीद मे।। उन्मा ममंद वृषभो मरुत्वान् त्वक्षीयसावयसा नाधमानम्। घृणीवच्छायामरपा अशीया विवासेयं रुद्रस्य सुम्नम्।। ओं सत्यं श्री साम्बाय नमः स्नानं समर्पयामि।

६ क्षीरम् — दूध।।

आप्यायस्व समेतु ते विश्वतस्सोम वृष्णियम्। भवा वाजस्य सङ्गथे।। श्री साम्बाय नमः क्षीरेण स्नापयामि ईशानमन्त्रेण शुद्धोदकेन स्नापयामि।

७ दधि — दही।।

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्राण आयूंषि तारिषत्।। श्री साम्बाय नमः दध्ना स्नापयामि, तत्पुरुषमन्त्रेण शुद्धोदकेन स्नापयामि।

८ घृतम्—तूप।।

शुक्रमसि ज्योतिरसि तेजोऽसि देवो वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः। श्री साम्बाय नमः, घृतेन स्नापयामि, अघोरमन्त्रेण शुद्धोदकेन स्नापयामि।

९ मधु —मध।।

मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नस्सन्त्वोषधीः। मधुनक्तमुतोषसो मधुमत्पार्थिवं रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमामस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।। श्रीसाम्बाय नमः मधुना स्नापयामि, वामदेवमन्त्रेण शुद्धोदकेन स्नापयामि।

१० शर्करामन्त्रः —साखर।।

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुह वीतु नाम्ने। स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधु माम् अदाभ्यः।। श्री साम्बाय नमः शर्करया स्नापयामि, सद्योजातमन्त्रेण शुद्धोदकेन स्नापयामि।।

११ कदळीरसः — केळरस।।

प्रकाव्य मुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति। महिव्रतश्शुचिबन्धुः पावकः पदावराहो अभ्येति रेभन्।। श्रीसाम्बाय नमः कदळीरसेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

१२ द्राक्षारसः — द्राक्षाचा रस/मणुका।।

प्रत आश्विनीः पवमान धीजुवो दिव्या असृग्रन् पयसा धरीमणि। प्रान्तर्ऋषयः स्थाविरीसृक्षतये त्वा मृजन्त्यृषिषाण वेधसः।। श्रीसाम्बाय नमः द्राक्षारसेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

१३ कपित्थरसः — कवटाचा रस।।

आक्रान्समुद्रः प्रथमे विधर्मन् जनयन् प्रजा भुवनस्य राजा। वृषापवित्रे अधिसानो अव्ये बृहत्सोमो वावृध्वे सुवान इन्दुः।। श्रीसाम्बाय नमः, कपित्थरसेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

१४ खर्जूररसः — खारीक।।

असृक्षत प्रवाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरया शवः।। श्रीसाम्बाय नमः, खर्जूररसेन स्नापयामि, शुद्धोदकेन स्नापयामि।

१५ उर्वारुकरसः — वाळुक/काकडी।।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।।

श्रीसाम्बाय नमः, उर्वारुकरसेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

१६ इक्षुरसः — ऊस।।

प्रजापतेर्वा एतानि पक्ष्माणि दयश्ववाला ऐक्षवी तिरश्ची। यदस्ववालः प्रस्तरो भवत्यैक्षवी तिरश्ची। श्रीसाम्बाय नमः, इक्षुरसेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

१७ नारिकेलरसः — नारळपाणी।।

आपोऽवा इदमासन् सलिलमेव। सप्रजापतिरेकः पुष्करपर्णे समभवत्। तस्यान्तर्मनसि कामस्समवर्तत। इदग्ँ सृजेयमिति।। श्रीसाम्बाय नमः, नारिकेलरसेन, मूलेन शुद्धोदकेन स्नापयामि।

१८ आम्लरसः — लिंबू।

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततर्नू तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशत।। श्रीसाम्बाय नमः, आम्लोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

१९ तैलम् – सुगंधी तेल/तीळ तेल
अभ्यञ्जनमभ्यञ्जनाय यथाभागमेवैनान् प्रीणाति।। श्री साम्बाय नमः सुगन्धतैलेन स्नापयामि।
२० परमान्नम् – भात/ पंचखाद्य – खारीक, खोबर, खडीसाखर, खिसमिस, खसखस
अन्नं ब्रह्मेति व्यजानात्। अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्तीति।। श्रीसाम्बाय नमः, परमान्नेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।
२१ गोधूमपिष्टम् – गव्हाचे पीठ।।
तमुष्टवामयं गिरं इन्द्रमक्थानि वावृधुः। पुरुण्यस्य पौस्यासिषा सन्तो वनामहे।। श्रीसाम्बाय नमः, गोधूमपिष्टोदकेन स्नापयामि, मूलेन शुध्दोदकेन स्नापयामि।
२२ मुद्‍गपिष्टम् – मुगाचे पीठ।।
पिबा सोममिन्द्र मन्दतु त्वायन्ते सुषाव हर्यश्वाद्रिः।

सोतुर्बाहुभ्यां सुयतो नार्वाम्।। श्रीसाम्बाय नमः, मुद्गपिष्टोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

२३ तंडुलपिष्टम् — तांडुळाचे पीठ।।

अणोरणीयान्महतो महीयानात्मा गुहायां निहीतोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्।। श्रीसाम्बाय नमः, तण्डुलपिष्टोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

२४ हरिद्रापिष्टम् — हळदपूड।।

तपोष्यवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन्। अवन्त्यस्य पवीतारमाशवो दिवस्सृष्टमधितिष्ठन्ति चेतसा।। श्रीसाम्बाय नमः, हरिद्रापिष्टोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

२५ आमलकपिष्टम् — आवळा पूड /आवळकंठी।।

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः। सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः।। श्रीसाम्बाय नमः, आमलकपिष्टोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

२६ कुशोदकम् — दर्भ।।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे। श्रीसाम्बाय नमः, कुशोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

२७ कोष्ठोदकम् —कोष्ठकोलिंजन।।

यः पावमानीरध्येत्यृषिभिस्सम्भृतं रसम्। सर्वं सपूतमश्नाति स्वदितं मातरिश्वना।। श्रीसाम्बाय नमः, कोष्ठोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

२८ भस्मोदकम् — गोभस्म।।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।। श्रीसाम्बाय नमः, भस्मोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

२९कन्दोदकम् — जटाशंकर।।

हग्ंसश्शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्।

नृषद्वरसदृतसव्दयोंमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्।।
श्रीसाम्बाय नमः, कन्दोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३० पुष्पोदकम्।।

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्तानो मुचन्त्वगं् हसः।। श्रीसाम्बाय नमः, पुष्पोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३१ पत्रोदकम् – दवणा, मंजपत्री।।

पावमानीर्यो अध्येस्यृषिभिस्सम्भृतं रसम्। तस्मै सरस्वती दुहे क्षीरं सर्पिमधूदकम्।। श्रीसाम्बाय नमः, पत्रोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३२ पिप्पलोदकम् – पिंपळ।।

पावमानीः स्वस्त्ययनीस्सुदुधा हि घृतश्रुतः। ऋषिभिस्सम्भूतो रसो ब्राह्मणेष्वमृतं हितम्।। श्रीसाम्बाय नमः, पिप्पलोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३३ पल्लवोदकम् — आंबा, उंबर, वड, पिंपळ, जांभूळ।।
पावमानीर्दिशन्तु नः इमं लोकमथो अमुम्। कामान्समर्धयन्तु नो देवीर्देवैस्समाहिताः।। श्रीसाम्बाय नमः, पल्लवोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३४ मूलोदकम् — दशमूलचूर्ण।।
येन देवाः पवित्रेणात्मानं पुनते सदा। तेन सहस्त्रधारेण पावमान्यः पुनन्तु माम्।। श्रीसाम्बाय नमः, मूलोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३५ स्वर्णोदकम् — सोने।।
ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः।। श्रीसाम्बाय नमः, स्वर्णोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३६रत्नोदकम्—मोती/पवळा/पाचू/गोमेद/हिरा।
सहि रत्नानि दाशुषे सुवाति सविता भगः।

तं भागं चित्रमीमहे।। श्रीसाम्बाय नमः, रत्नोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३७ मन्त्रोदकम् —

तरत्समं दीधावति धारासु तस्यान्धसः। तरत्समं दीधावति।। श्रीसाम्बाय नमः, मन्त्रोदकेन स्नापयामि, मूलेन शुध्दोदकेन स्नापयामि।

३८ यवोदकम् — देवजवा।।

यवोषि यवयास्मद्द्वेषो यवयारातीः।। श्रीसाम्बाय नमः, यवोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३९ गोधूमोदकम् — गहु।।

आमावाजस्थ प्रसवो जगम्यादित्याह । अन्नं वै वाजः।। अन्नमेवावरुन्धे। यथालोकं वा एत उज्जयन्ति। य आजिं धावन्ति।। श्रीसाम्बाय नमः, गोधूमोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४० मुद्गोदकम् — मूग॥

कृष्णलं कृष्णलं वाजसृद्भय: प्रयच्छति। यमेव ते वाजं लोकमुज्जयन्ति॥ श्रीसाम्बाय नम:, मुग्दोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४१ तिलोदकम् — तीळ॥

सन्ते मनसा मनस्संप्राणेन प्राणो जुष्टं देवेभ्यो हव्य घृतवत्स्वाहा॥ श्रीसाम्बाय नम:, तिलोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४२ व्रीहियुदकम् — साळी॥

इदं देवानामिदमुनस्सह स्फात्यै त्वा नारात्यै। सुवरभिविख्येषं वैश्वानरं ज्योति:॥ श्रीसाम्बाय नम:, व्रीह्युदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४३ शमीपत्रोदकम् — सौंदळ ॥

यत्पर्यपश्यत्सरिरस्य मध्ये। उर्वीमपश्यज्जगत: प्रतिष्ठाम्। तत्पुष्करस्यायतनाद्धि जातम्। पर्ण पृथिव्या: प्रथनगं हरामि॥

श्रीसाम्बाय नमः, शमीपत्रोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४४ बिल्वपत्रोदकम् — बेल।।

याभिरद‍ृगं हज्जगतः प्रतिष्ठाम्। उर्वीमिमां विश्वजनस्य भर्त्रीम्। ता नश्शिवाश्शर्करास्सन्तु सर्वाः। अग्नेरेतश्चन्द्रग्ं हिरण्यम्।। श्रीसाम्बाय नमः, बिल्वपत्रोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४५ कुन्दपत्रोदकम् — पारिजातक।।

अश्वो रूपं कृत्वा यदश्वत्थेऽतिष्ठः। संवत्सरं देवेभ्यो निलाय।। तत्ते न्यक्तमिहा सम्भरंतः। शतं जीवेम शरदस्सवीराः।। श्रीसाम्बाय नमः, कुन्दपत्रोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४६ मन्दारपत्रोदकम् — पांढरी रूचकी।।

ऊर्जः पृथिव्या अध्युत्थितोऽसि। वनस्पते शतवल्शो विरोह।। त्वया वयमिषमूर्जं मदन्तः। रायस्पोषेण समिषा मदेम।। श्रीसाम्बाय नमः, मन्दारपत्रोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४७ करवीरपत्रोदकम् — कन्हेर।।

गायत्रिया ह्रियमाणस्य यत्ते। पर्णमपतत्तृतीयस्यै दिवोऽधि। सोऽयं पर्णस्सौम पर्णाद्धि जातः। ततो हरामि सोमपीथस्यावरुद्धये।। श्रीसाम्बाय नमः, करवीरपत्रोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४८ कुंकुमोदकम् — कुंकु।।

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीग्ं सर्वभूतानां तामिहोपह्वये श्रियम्।। श्रीसाम्बाय नमः, कुंकुमोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

४९ रोचनोदकम् — गोरोचन।।

महाग्ँ इंद्रो वज्रबाहुः षोडशी शर यच्छतु। स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान् द्वेष्टि।। श्रीसाम्बाय नमः, रोचनोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

५० कर्पूरोदकम् ।।

महॉग् इन्द्रो नृवदाचर्षणिप्रा उत द्विबर्हा अमिवस्सहोभिः।

अस्मद्रियग्वावृधे वीर्यायोरुः पृथुस्सुकृतः कर्तृमिर्भूत्।। श्रीसाम्बाय नमः, कर्पूरोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

५१ चन्दनोदकम् — चंदन।।

पिप्रीही देवांग् उशतो यविष्ठ। विद्वाग् ऋतूग् ऋतुपते यजेह।। ये दैव्या ऋत्विजस्तेभिरग्ने त्वग् होतृणामस्या यजिष्ठः।। श्रीसाम्बाय नमः, चन्दनोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

५२ रक्तचन्दनोदकम् — रक्तचंदन लाल।।

सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै। भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः।। श्रीसाम्बाय नमः, रक्तचन्दनोदकेन स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

श्री गुरूभ्यो नमः।

ओं गणानां त्वा गणपतिं हवामहे कविं कवीनामुपश्रवस्तमम्।
ज्येष्ठराजं ब्रह्मणस्पत आ नः शृण्वन्नुतिभिः सीदुसादनम्।।
अयं मे हस्तो भगवानयं मे भवगत्तरः।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः।।

गं गणपतये नमः।

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभः।
निर्विघ्नं कुरू मे देव सर्वकार्येषु सर्वदा।।

।।श्रीरुद्राध्यायप्रारम्भः।।

ओं अस्य श्री रुद्रस्य प्रश्नस्य अनुष्टुप् छन्दः, अघोर ऋषिः, संकर्षणमूर्तिर्स्वरुपो योऽसावादित्यः परमपुरुषः सः एषः रुद्रो देवता, अग्निक्रतुचरमायामिष्टिकायां शतरुद्रीयजपाभिषेकयोर्विनियोगः। सकलस्य रुद्राध्यायस्य श्रीरुद्रो देवता, एका गायत्रीच्छन्दः,

तिस्त्रोऽनुष्टुभस्तिस्त्र: पङ्क्तय:, सप्तानुष्टुभो द्वे जगत्यौ, श्री परमेष्ठी ऋषि:, श्री परमेश्वरप्रीत्यर्थे शतरुद्रीयजपेऽभिषेके च विनियोग:।

।। करन्यास:।। अग्निहोत्रात्मने अङ्गुष्ठाभ्यां नम:। दर्शपूर्णमासात्मने तर्जनीभ्यां नम:। चातुर्मास्यात्मने मध्यमाभ्यां नम:। निरूढपशुबन्धात्मने अनामिकाभ्यां नम:। ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नम:। सर्वक्रत्वात्मने करतलकरपृष्ठाभ्यां नम:।।

।। देहन्यास:।। अग्निहोत्रात्मने हृदयाय नम:। दर्शपूर्णमासात्मने शिरसे स्वाहा। चातुर्मास्यात्मने शिखायै वषट्। निरूढपशुबन्धात्मने कवचाय हुं। ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट्। सर्वक्रत्वात्मने अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बन्ध:।।

आपातालनभ:स्थलान्तभुवनब्रह्माण्डमाविस्फुरज्ज्योतिस्फाटिकलिङ्ग
मौलिविलसत्पूर्णेन्दुवान्तामृतै:। अस्तोकाप्लुतमेकवारमनिशं रुद्रानुवाकान् जपन् ध्यायेदीप्सितसिद्धये ध्रुवपदं विप्रोऽभिषिञ्चेच्छिवम्।।१।।
ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गै: कण्ठेकाला:

कपर्दाकलितशशिकलाश्चण्डकोदण्डहस्ताः। त्र्यक्षा रुद्राक्षभूषास्सुललितविभवाश्शाम्भवा मूर्तिभेदाः रुद्राः श्रीरुद्रसूक्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम्।।२।।

शुद्धस्फटिकसंकाशं शुद्धविद्याप्रदायकम्। शुद्धं पूर्णचिदानन्दं सदाशिवमहं भजे।।३।।

हरः ओं। नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः।। या त इषुः शिवतमा शिवं बभूव ते धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय।। या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तनुवा शन्तमया गिरिशन्ताभि चाकशीहि।। यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिंगॅसीः पुरुषं जगत्।। शिवेन वचसा त्वा गिरिशाच्छा वदामसि। यथा नस्सर्वमिज्जगदयक्ष्मगॅ सुमना असत्।। अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहीगॅश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः।। असौ यस्ताम्रो अरुण उत बभ्रुः

सुमङ्गलः। ये चेमार्ग रुद्रा अभितो दिक्षुः। श्रितास्सहस्त्रशो वैषार्ग हेड ईमहे।। असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा अदृशन्नदृशन्नुदहार्यः।। उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः।। नमो अस्तु नीलग्रीवाय सहस्त्राक्षायमीढुषे। अथो ये अस्य सत्त्वानोऽहं तेभ्योऽकरं नमः।। प्रमुञ्च धन्वनस्त्वमुभयोरार्त्निर्योर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप।। अवतत्य धनुस्त्वर्ग सहस्त्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव।। विज्यं धनुः कपर्दिनो विशल्यो बाणवार्ग उत। अनेशन्नस्येषव आभुरस्य निषङ्गधिः।। या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मान् विश्वतस्तमयक्ष्मया परिब्भुज।। नमस्ते अस्त्वायुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।। परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम्।। नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरुषाय त्रिपुरान्तकाय त्रिकालाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय

मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः।। ।। इति प्रथमोऽनुवाकः।।

ओं नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो। नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो। नमः सस्पिञ्जराय त्विषीमते पथीनां पतये नमो। नमः बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो। नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो। नमो भवस्य हेत्यै जगतां पतये नमो। नमो रुद्रायाततताविने क्षेत्राणां पतये नमो। नमः सूतायाहन्त्याय वनानां पतये नमो। नमो रोहिताय स्थपतये वृक्षाणां पतये नमो। नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो। नमो भुवन्तये वारिस्कृतायौषधीनां पतये नमो। नम उच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो। नमः कृत्स्नवीताय धावते सत्त्वानां पतये नमः।। ।। इति द्वितीयोऽनुवाकः।।

ओं नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो। नमः ककुभाय निषंङ्ग्गिणे स्तेनानां पतये नमो। नमो निषङ्ग्गिण इषुधिमते

तस्कराणां पतये नमो। नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो। नमो निचेरवे परिचरायारण्यानां पतये नमो। नमः सृकाविभ्यो जिघाँसद्भ्यो मुष्णतां पतये नमो। नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये नमो। नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो। नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो। नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो। नम आयच्छद्भ्यो विसृद्भ्यश्च वो नमो। नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो। नम आसीनेभ्यश्शयानेभ्यश्च वो नमो। नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो। नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो। नमः सभाभ्यः सभापतिभ्यश्च वो नमो। नमो अश्वेभ्योऽश्वपतिभ्यश्च वो नमः।। ।। इति तृतीयोऽनुवाकः।।

ओं नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो। नम उगणाभ्यस्तृगँ हतीभ्यश्च वो नमो। नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो। नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो। नमो गणेभ्यो गणपतिभ्यश्च वो नमो। नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो।

नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो। नमो रथिभ्योऽरथेभ्यश्च वो नमो। नमो रथेभ्यो रथपतिभ्यश्च वो नमो। नमः सेनाभ्यस्सेनानिभ्यश्च वो नमो। नमः क्षतृभ्यस्संग्रहीतृभ्यश्च वो नमो। नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो। नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो। नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो। नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो। नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो। नमः श्वभ्यः श्वपतिभ्यश्च वो नमः।। ।। इति चतुर्थोऽनुवाकः।।

ओं नमो भवाय व रुद्राय च। नमश्शर्वाय च पशुपतये च। नमो नीलग्रीवाय च शितिकण्ठाय च। नमः कपर्दिने च व्युप्तकेशाय च। नमः सहस्त्राक्षाय च शतधन्वने च। नमो गिरिशाय च शिपिविष्टाय च। नमो मीढुष्टमाय चेषुमते च। नमो ह्रस्वाय च वामनाय च। नमो बृहते च वर्षीयसे च। नमो वृद्धाय च संवृध्वने च। नम अग्रियाय च प्रथमाय च। नम आशवे चाजिराय च। नमः शीघ्रियाय च शीभ्याय

च। नम ऊर्म्याय चावस्वन्याय च। नमः स्त्रोतस्याय च द्वीप्याय च।।
।। इति पञ्चमोऽनुवाकः।।

ओं नमो ज्येष्ठाय च कनिष्ठाय च। नमः पूर्वजाय चापरजाय च। नमो मध्यमाय चापगल्भाय च। नमो जघन्याय च बुध्नियाय च। नमः सोभ्याय च प्रतिसर्याय च। नमो याम्याय च क्षेम्याय च। नम उर्वर्याय च खल्याय च। नमः श्लोक्याय चावसान्याय च। नमो वन्याय च कक्ष्याय च। नमः श्रवाय च प्रतिश्रवाय च। नम आशुषेणाय चाऽऽशुरथाय च। नमः शूराय चावभिन्दते च। नमो वर्मिणे च वरुथिने च। नमो बिल्मिने च कवचिने च। नमः श्रुताय च श्रुतसेनाय च।। ।। इति षष्ठोऽनुवाकः।।

ओं नमो दुन्दुभ्याय चाऽऽहनन्याय च। नमो धृष्णवे च प्रमृशाय च। नमो दूताय च प्रहिताय च। नमो निषङ्गिणे चेषुधिमते च। नमस्तीक्ष्णेषवे चाऽऽयुधिने च। नमः स्वायुधाय च सुधन्वने च। नमः स्त्रुत्याय च पथ्याय च। नमः काटयाय च नीप्याय च। नमः सुद्याय

च सरस्याय च। नमो नाद्याय च वैशन्ताय च। नमः कूप्याय चावटयाय च। नमो वर्ष्याय चावर्ष्याय च। नमो मेघ्याय च विद्युत्याय च। नम ईध्रियाय चाऽऽतप्याय च। नमो वात्याय च रेष्मियाय च। नमो वास्तव्याय च वास्तुपाय च।। ।। इति सप्तमोऽनुवाकः।।

ओं नमः सोमाय च रुद्राय च। नमस्ताम्राय चारुणाय च। नमः शङ्गाय च पशुपतये च। नम उग्राय च भीमाय च। नमो अग्रेवधाय च दूरेवधाय च। नमो हन्त्रे च हनीयसे च। नमो वृक्षेभ्यो हरिकेशेभ्यो। नमस्ताराय नमः शम्भवे च मयोभवे च। नमः शङ्कराय च मयस्कराय च। नमः शिवाय च शिवतराय च। नमस्तीर्थ्याय च कूल्याय च। नमः पार्याय चावार्याय च। नमः प्रतरणाय चोत्तरणाय च। नम आतार्याय चाऽऽलाद्याय च। नमः शष्प्याय च फेन्याय च। नमः सिकत्याय च प्रवाह्याय च।। ।। इति अष्टमोऽनुवाकः।।

ओं नम इरिण्याय च प्रपथ्याय च। नमः किंशॅ शिलाय च क्षयणाय च। नमः कपर्दिने च पुलस्तये च। नमो गोष्ठयाय च गृह्याय च।

नमस्तल्प्याय च गेह्याय च। नमः काटयाय च गह्वरेष्ठाय च। नमो हृदयाय च निवेष्प्याय च। नमः पार्गसव्याय च रजस्याय च। नमः शुष्क्याय च हरित्याय च। नमो लोप्याय चोलप्याय च। नम ऊर्व्याय च सूर्म्याय च। नमः पर्ण्याय च पर्णशद्याय च। नमोऽपगुरमाणाय चाभिघ्नते च। नम आक्खिदते च प्रक्खिदते च। नमो वः किरिकेभ्यो देवानार्ग हृदयेभ्यो। नमो विक्षीणकेभ्यो देवानार्ग हृदयेभ्यो। नमो विचिन्वत्केभ्यो देवानार्ग हृदयेभ्यो। नम आनिर्हतेभ्यो देवानार्ग हृदयेभ्यो। नम आमीवत्केभ्यो देवानार्ग हृदयेभ्यः।। ।। इति नवमोऽनुवाकः।।

ओं द्रापे अन्धसस्पते दरिद्रं नीललोहित। एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किंचना ममत्।। या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी। शिवा रुद्रस्य भेषजी तया नो मृड जीवसे।। इमार्ग रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम्। यथा नः शमशद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम्।। मृडा नो रुद्रो

तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ। मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः। मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते। आरात्ते गोघ्न उत पूरुषघ्ने क्षयव्दीराय सुम्नमस्मे ते अस्तु। रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ व्दिबर्हाः। स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्। मृडा जरित्रे रुद्रस्तवानो अन्यं ते अस्मन्निवपन्तु सेनाः। परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भयस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय। मीढुष्टम शिवतम शिवो नः सुमना भव। परमे वृक्ष आयुधं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि। विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्त्रगॅ

हेतयोऽन्यमस्मिन्निवपन्तु ताः। सहस्त्राणि सहस्त्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि।। ।। इति दशमोऽनुवाकः।।
ओं सहस्त्राणि सहस्त्रशो ये रुद्रा अधि भूम्याम्। तेषागॅ सहस्त्रयोजनेऽव धन्वानि तन्मसि। अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ...तेषागॅ। नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः...तेषागॅ। नीलग्रीवाः शितिकण्ठा दिवगॅ रुद्रा उपश्रिताः...तेषागॅ। ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः....तेषागॅ। ये भूतानामधिपतयो विशिखासः कपर्दिनः....तेषागॅ। ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् .... तेषागॅ। ये पथां पथि रक्षय ऐलबृदा यव्युधः ....तेषागॅ। ये तीर्थानि प्रचरन्ति सृकावन्तो निषगिंणः.... तेषागॅ। य एतावन्तश्च भूयागंसश्च दिशो रुद्रा वितस्थिरे। तेषागॅ सहस्त्रयोजनेऽवधन्वानि तन्मसि। नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं व्दिष्मो यश्च नो व्देष्टि तं वो जम्भे दधामि।। त्र्यम्बकं

यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।। एते सहस्त्रमयुतं पाशा मृत्योर्मर्त्याय हन्तवे। तान् यज्ञस्य मायया सर्वानवयजामहे।। मृत्यवे स्वाहा मृत्यवे स्वाहा।। ओं नमो भगवते रुद्राय मृत्युर्मे पाहि। यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनानि विवेश तस्मै रुद्राय नमो अस्तु।। ।। इति एकादशोऽनुवाकः।।

अथ चमकाध्यायः।। ओं अग्नाविष्णू सजोषसे मा वर्धन्तु वां गिरः। द्युम्नैर्वाजेभिरागतम्। वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म अधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽगांनि च

मेऽस्थानि च मे परूगॅषि च मे शरीराणि च मे।। ।। इति प्रथमोऽनुवाकः।।

ओं जैष्ठयं च मे आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च मे ऋद्धं च मे ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे।। ।। इति द्वितीयोऽनुवाकः।।

ओं शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वश्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च

मे लयश्च म ऋतुं च मेऽमृतं च मे यक्ष्मं च मेऽनामयश्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे।। ।। इति तृतीयोऽनुवाकः।।

ओं उर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च मे औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च। मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसूराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे।। ।। इति चतुर्थोऽनुवाकः।।

ओं अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च मे आपश्च मे वीरुधश्च मे

ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशवश्च मे आरण्याश्च मे यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च मे एमश्च मे इतिश्च मे गतिश्च मे।। ।। इति पञ्चमोऽनुवाकः।।

ओं अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे।। ।। इति षष्ठोऽनुवाकः।।

ओं अगॅशुः च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपागॅशुश्च मेऽन्तर्यामश्च म ऐन्द्रावायवश्च मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च ध्रुवश्च मे वैश्वानरश्च मे ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे।। ।। इति सप्तमोऽनुवाकः।

ओं इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च मे अग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे।। ।। इति अष्टमोऽनुवाक।।

ओं अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे

शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्टया बृहद्रथन्तरे च मे यज्ञेन कल्पताम्।। इति नवमोऽनुवाकः।।

ओं गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पंचावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे षष्ठवाच्च मे षष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहश्च मेऽनड्वांश्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्।।
।। इति दशमोऽनुवाकः।।

ओं एका च मे तिस्त्रश्च मे पञ्च च मे सप्त च मे नव च मे एकादश च मे त्रयोदश च मे पंचदश च मे सप्तदश च मे नवदश

च मे एकविंशतिश्च मे त्रयोविशंतिश्च मे पञ्चविशंतिश्च मे सप्तविशंतिश्चमे नवविशंतिश्च मे एकत्रिंशच्च मे त्रयत्रिंशच्च मे चतस्त्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विंशतिश्च मे चतुर्विशंतिश्च मेऽष्टाविशंतिश्च मे द्वात्रिंशच्च मे षट्त्रिंशच्च मे चत्वारिशच्च मे चतुश्चत्वारिंशच्च मेऽष्टाचत्वारिंशच्च मे वाजश्च प्रसवश्च पिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्चाधिपतिश्च।।

।। इति एकादशोऽनुवाकः।।

ओं इडा देवहूमनुर्यज्ञनीर्बृहस्पतिरुक्था मदा निशंदिषद् विश्वेदेवाः सूक्तवाचः पृथिवि मातर्मा मा हिर्गॅसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु।। ।।

ओं शान्तिः शान्तिः शान्तिः।। अनेन रूद्राभिषेकेन इष्टलिङ्गदेवता—प्राणलिङ्गदेवता—भावलिङ्गदेवता प्रीयतां प्रीयतां प्रीयताम्।।

१ सुवासितजलम्।।

स्वाद्वीं त्वा स्वादुना। तीव्रां तीव्रेण। अमृताममृतेन। मधुमतीं मधुमता।। श्रीसाम्बाय नमः, कुंकुमकर्पूरकस्तूरीसुवासितजलेन स्नापयामि, मूलेन शुध्दोदकेन स्नापयामि।

२ अविच्छिन्नधारा।।

सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषस्सप्तजिव्हाः।

सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयां निहितास्सप्त सप्त। अतस्समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवस्सर्वरूपाः। अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यन्तरात्मा।। श्रीसाम्बाय नमः, अविच्छिन्नधारया स्नापयामि, मूलेन शुद्धोदकेन स्नापयामि।

३ अभिषेकसमापनम्।।

आभिर्गीभिर्यदतोन ऊनमाप्यायय हरिवो वर्धमानः। यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम। ब्रह्म प्रावादिष्म तन्नो मा हासीत्। ओं शान्तिः शान्तिः शान्तिः।। श्रीसाम्बाय नमः अभिषेकसमाप्तिं करोमि।

४ भस्म।।

अनादि शाश्वतं शान्तं चैतन्यं चित्स्वरूपकम्। चिदङ्गं वृषभाकारं चिद्भस्म लिङ्गधारणम्।। त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।। श्रीसाम्बसदाशिवाय नमः भस्म धारयामि।

५ वस्त्रम्।।

मायाचित्रपटच्छन्न निजगुह्योरुतेजसे। निरावरणविज्ञानवस्त्रं ते कल्पयाम्यहम्।। क्वऽस्य ते रुद्र मृडयाकुर्हस्तो यो अस्ति भेषजो

जलाषः। अपभर्ता रपसो दैव्यस्याभीनुमा वृषभा चक्षमीथाः।। श्रीसाम्बाय नमः, वस्त्रं धारयामि।

६ यज्ञसूत्रम्।।

यस्य शक्तित्रयेणेदं संप्रोतमखिलं जगत्। यज्ञसूत्राय ते तस्मै यज्ञसूत्रं प्रकल्पये।। नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो। नमो भवस्य हेत्यै जगतां पतये नमः।। श्रीसाम्बाय नमः, यज्ञोपवीतं समर्पयामि।

७ गन्धः।।

परमानन्दसौरभ्यं परिपूर्णदिगन्तरम्। गृहाण परमं गन्धं कृपया परमेश्वर।। गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीग्ँ सर्वभूतानां तामिहोपव्हये श्रियम्।। श्रीसाम्बसदाशिवाय नमः गन्धं धारयामि।

८ अक्षता।।

अक्षतान् धवलान् दिव्यास्तिलतण्डुलमिश्रितान्।
अर्पयामि महाभक्त्या प्रसीद परमेश्वर।।

उपास्मै गायता नरः पवमानायेन्दवे। अभि देवान् इयक्षते।। श्रीसाम्बसदाशिवाय नमः अक्षतान् धारयामि।

९ बिल्वपत्रम्।।

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम्। त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम्।। याभिरदृगं हज्जगतः प्रतिष्ठाम्। उर्वीमिमां विश्वजनस्य भर्त्रीम्। तानश्शिवाश्शर्करास्सन्तु सर्वाः। अग्नेरेतश्चंद्रग्ँ हिरण्यम्।। श्रीसाम्बसदाशिवाय नमः बिल्वपत्राणि धारयामि।

१० पुष्पम्।।

तुरीयवनसम्भूतं नानागुणसमन्वितम्। आनन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम्।। अर्हन् बिभर्षि सायकानि धन्वा अर्हन्निष्कं यजतं विश्वरूपम्। अर्हन्निदं दयसे विश्वमभ्भुवं न वा ओजीयो रुद्र त्वदस्ति।। श्रीसाम्बसदाशिवाय नमः नानाविधपुष्पाणि समर्पयामि।

११ धूपः।।

वनस्पतिरसोपेतो गन्धाढ्यो धूप उत्तमः।

आघ्रेयस्सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।। स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम्। मृडाजरित्रे रुद्रस्तवानो अन्यन्ते अस्मन्निवपन्तु सेना:।। श्रीसाम्बसदाशिवाय नम: धूपम् आघ्रापमयामि।

१२ दीप:।।

स्वप्रकाश महादेव: सर्वतस्तिमिरापह:। सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम्।। कुमारश्चित्पितरं वन्दमानं प्रतिनानारुद्रोपयन्तम्। भूरेदातारं सत्पतिं गृणीषे स्तुतस्त्वं भेषजा रास्यस्मे।। श्रीसाम्बसदाशिवाय नम: दीपं नीराजयामि।

१३ कर्पूरदीप:।।

कर्पूरनिर्मितं दीपं स्वर्णपात्रे निवेशितम्। नीराजितं मया भक्त्या गृहाण परमेश्वर।। श्रीसाम्बसदाशिवाय नम: कर्पूरदीपं नीराजयामि।

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्।।धृ।। सदावसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि।।१।। गुणातीतकान्तं परब्रह्मशान्तं सुविद्यादिदेवं भवारण्यदाहम्।।२।। उमानाथमीशं

जराजन्मनाशं परं ज्योतिर्लिंगं नमामि इष्टलिङ्गम्।।३।। बहुग्वै बह्वश्वायै बह्वजाविकायै। बहुव्रीहियवायै बहुमाषतिलायै। बहुहिरण्यायै बहुहस्तिकायै। बहुदासपुरुषायै रयिमत्यै पुष्टिमत्यै। बहुरायस्पोषायै राजास्तु।। श्रीसाम्बाय नमः, कर्पूरदीपं दर्शयामि।

१४ नैवेद्यम्।।

नैवेद्यं षड्रसोपेतं नानाभक्ष्यसमन्वितम्। दधिक्षीरघृतोपेतं नैवेद्यं प्रतिगृह्यताम्।। अन्नं बहु कुर्वीत। तद्व्रतं। पृथिवी वा अन्नम्। आकाशोऽन्नादः। पृथिव्यामाकाशः प्रतिष्ठितः। आकाशे पृथिवी प्रतिष्ठिता। तदेतन्नमन्ने प्रतिष्ठितम्।। प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, उदानाय स्वाहा, समानाय स्वाहा। श्रीसाम्बसदाशिवाय नमः नैवेद्यं निवेदयामि, नैवेद्यान्ते पानीयं समर्पयामि।

१५ ताम्बूलम्।।

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम्। कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यताम्।। परिणो रुद्रस्य हेतुर्वृणक्तु परित्वेषस्य दुर्मतिर्घायोः।

अवस्थिरामघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय।। श्रीसाम्बसदाशिवाय नमः ताम्बूलं समर्पयामि ताम्बूलान्ते पानीयं समर्पयामि।

१६ दक्षिणा।।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदं प्रयच्छामि महेश्वर।। हिरण्यरुपस्स हिरण्यसंघ्रपां न पात्सेदु हिरण्यवर्णः। हिरण्ययात्परि योनेर्निषद्या हिरण्यदाददत्यन्नमस्मै।। श्रीसाम्बसदाशिवाय नमः दक्षिणां समर्पयामि अर्घ्यं स्वाहा।

१७ घण्टानादः।।

आगमार्थं तु देवानां गमनार्थ तु रक्षसाम्। कुर्वे घण्टारवं नित्यं सर्वोपद्रवनाशनम्।। व्यतिषक्ताभिस्तुवते। व्यतिषक्तो वै ग्रामणीस्सजातैः। सजातैरेवैनं व्यतिषजति। व्यतिषक्ताभिस्तुवते। व्यतिषक्तो वै पुरुषः पाप्मभिः। व्यतिषक्ताभिरेवास्य पाप्मनो नुदते।। श्रीसाम्बसदाशिवाय नमः घण्टानादः श्रावयामि।

१८ दर्पणम् —

आरसा।। पूर्वे पूर्वेभ्यो वचः एतदूचुः। आदर्शमग्निं चिन्वानाः। पूर्वे विश्वसृजोऽमृताः। शतं वर्षसहस्त्राणि।। श्रीसाम्बाय नमः, दर्पणं दर्शयामि।

१९ छत्रम् —छत्री।।

मरुतां च विहायसां। कामप्रयवणं मे अस्तु। सह्येवास्मि सनातनः। इति नाको वन्हिश्रवोरायोधनं पुत्रानापो देवीरिहाहित।। श्रीसाम्बाय नमः, छत्रं समर्पयामि।

२० चामरव्दयम् —२

चवरी।। सोमो वा एतस्य राज्यमादत्ते। यो राजासन् राज्यो वा सोमेन यजते। देवसुवामेतानि हवीगंषि भवंति। एतावन्तो वै देवानागं सवाः। त एवास्मै सवान् प्रयच्छन्ति। त एनं पुनस्सुवन्ते राज्याय। देवसु राजा भवति।। श्रीसाम्बाय नमः, चामरव्दये वीजयामि।

२१ व्यजनम् — पंखा।।

वायुस्ताग्ं अग्रे प्रमुमोक्तु देवः। प्रजापतिः प्रजया संविदानः। प्रमुञ्चमाना भुवनस्य रेतो गातुं धत्त यजमानाय देवाः।। श्रीसाम्बाय नमः व्यजनेन वीजयामि।

२२ पुष्पाञ्जलिः।।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। तेहनाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।। श्रीसाम्बसदाशिवाय नमः पुष्पाञ्जलिं समर्पयामि।

२३प्रदक्षिणा।।

प्रकृष्टपापनाशाय प्रकृष्टफलसिध्दये। प्रदक्षिणं करोमीश प्रसीद परमेश्वर।। पशूनाग्ं शर्मासि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्र भागस्सह स्वस्त्राबिम्कया तं जुषस्व।। श्रीसाम्बसदाशिवाय नमः प्रदक्षिणं करोमि ।

२४ नमस्कारः।।

नमः शिवाय शान्ताय नमः सोमाय शम्भवे। नमः शिवाय कल्याणीपतये ते नमो नमः।। नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतये उमापतये पशुपतये नमो नमः।। श्रीसाम्बसदाशिवाय नमः नमस्कारं करोमि।

२५ स्तोत्रम्।।

हर शम्भो महादेव विरुपाक्ष त्रिलोचन। दयासिन्धो दीनबन्धो रक्ष रक्ष महेश्वर।। मायासमुद्रपतितमनन्तकलुषान्वितम्। मामुद्धरं महेशान भक्तवत्सल शङ्कर।।

२६ बिल्वार्चना १०८

भवाय देवाय नमः। शर्वाय देवाय नमः। ईशानाय देवाय नमः। पशुपतये देवाय नमः। रुद्राय देवाय नमः। उग्राय देवाय नमः। भीमाय देवाय नमः। महते देवाय नमः। पूष्पाणि समर्पयेत्।

२६ तर्पणम्।।

भवं देवं तर्पयामि। शर्वं देवं तर्पयामि। ईशानं देवं तर्पयामि। पशुपति देवं तर्पयामि। रुद्रं देवं तर्पयामि। उग्रं देवं तर्पयामि। भीमं देवं तर्पयामि। महान्तं देवं तर्पयामि।

२७ प्रसादपुष्पधारणम्।।

ये ब्राह्मणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुध्दिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।।

२८ निर्माल्यविसर्जनम्।।

यो वै तां ब्रह्मणो वेद अमृतेनावतां पुरीम्। तस्मै ब्रह्म च ब्रह्मा च आयुः कीर्तिं प्रजां ददुः।।

२९ पादोदकम्।।

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरुपाक्षं विश्वरूपाय वै नमः।। श्रीसाम्बसदाशिवाय नमः तीर्थं स्वीकरोमि।

इष्टलिङ्गसंक्षिप्तपूजां कुर्यात्।

३० सज्जिकारोपणम्।।

एव बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि। हावनश्रुनो रुद्रेह बोधी। बृहद् वदेम विदथे सुवीराः।। मन्त्रलोप तन्त्रलोप क्रियालोप विद्धापराध—प्रायश्चित्तार्थं मूलमन्त्रजपं करिष्ये।।

अपराधसहस्त्राणि क्रियन्तेऽहर्निशं मया। पाहि माम् अपराधेभ्यः पितापुत्रमिव प्रियम्।

पूजासमापनम्।।

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकस्तेनान्नेनाप्यायस्व। अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः। ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्।। इति मत्कृतपूजया श्रीमदिष्टलिङ्गप्राणलिङ्गभावलिङ्गात्मा साम्बशिवः प्रीयताम्।। ।। पुष्पोदकम् ।। इति शिवपूजाविधिः।।

NANDI FOUNDATION

Juna Ganj, H.No-6/3/195,
Near Sri Moonjeshwara Mandir, Nanded.431604
Email- shashi.modi143@gmail.com
nandifoundation45@gmail.com
09405773134
www.nandifoundation.net